# Uma-Maheshvara Stotra

# ઉમામહેશ્વરસ્તોત્રમ્

## Document Information

Text title : Umamaheshvara Stotra Hymn in praise of Parvati and Shiva

File name : umamaheshvara.itx

Category : shiva, pArvatI, stotra, shankarAchArya

Location : doc_devii

Author : Sri Sankararacharya

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Latest update : Nov. 1„ 1999, February 3, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 3, 2023

*sanskritdocuments.org*

# ઉમામહેશ્વરસ્તોત્રમ્

નમઃ શિવાભ્યાં નવયૌવનાભ્યામ્
પરસ્પરાશ્લિષ્ટવપુર્ધરાભ્યામ્ ।
નગેન્દ્રકન્યાવૃષકેતનાભ્યામ્
નમો નમઃ શઙ્કરપાર્વતીભ્યામ્ ॥ ૧॥

નમઃ શિવાભ્યાં સરસોત્સવાભ્યામ્
નમસ્કૃતાભીષ્ટવરપ્રદાભ્યામ્ ।
નારાયણેનાર્ચિતપાદુકાભ્યાં
નમો નમઃ શઙ્કરપાર્વતીભ્યામ્ ॥ ૨॥

નમઃ શિવાભ્યાં વૃષવાહનાભ્યામ્
વિરિઞ્ચિવિષ્ણ્વિન્દ્રસુપૂજિતાભ્યામ્ ।
વિભૂતિપાટીરવિલેપનાભ્યામ્
નમો નમઃ શઙ્કરપાર્વતીભ્યામ્ ॥ ૩॥

નમઃ શિવાભ્યાં જગદીશ્વરાભ્યામ્
જગત્પતિભ્યાં જયવિગ્રહાભ્યામ્ ।
જમ્ભારિમુખ્યૈરભિવન્દિતાભ્યામ્
નમો નમઃ શઙ્કરપાર્વતીભ્યામ્ ॥ ૪॥

નમઃ શિવાભ્યાં પરમૌષધાભ્યામ્
પઞ્ચાક્ષરી પઞ્જરરઞ્જિતાભ્યામ્ ।
પ્રપઞ્ચસૃષ્ટિસ્થિતિ સંહૃતાભ્યામ્
નમો નમઃ શઙ્કરપાર્વતીભ્યામ્ ॥ ૫॥

નમઃ શિવાભ્યામતિસુન્દરાભ્યામ્
અત્યન્તમાસક્તહૃદમ્બુજાભ્યામ્ ।
અશેષલોકૈકહિતઙ્કરાભ્યામ્
નમો નમઃ શઙ્કરપાર્વતીભ્યામ્ ॥ ૬॥

નમઃ શિવાભ્યાં કલિનાશનાભ્યામ્
    કઙ્કાલકલ્યાણવપુર્ધરાભ્યામ્ ।
કૈલાસશૈલસ્થિતદેવતાભ્યામ્
    નમો નમઃ શઙ્કરપાર્વતીભ્યામ્ ॥ ૭॥

નમઃ શિવાભ્યામશુભાપહાભ્યામ્
    અશેષલોકૈકવિશેષિતાભ્યામ્ ।
અકુણ્ઠિતાભ્યામ્ સ્મૃતિસમ્ભૃતાભ્યામ્
    નમો નમઃ શઙ્કરપાર્વતીભ્યામ્ ॥ ૮॥

નમઃ શિવાભ્યાં રથવાહનાભ્યામ્
    રવીન્દુવૈશ્વાનરલોચનાભ્યામ્ ।
રાકાશશાઙ્કાભમુખામ્બુજાભ્યામ્
    નમો નમઃ શઙ્કરપાર્વતીભ્યામ્ ॥ ૯॥

નમઃ શિવાભ્યાં જટિલન્ધરભ્યામ્
    જરામૃતિભ્યાં ચ વિવર્જિતાભ્યામ્ ।
જનાર્દનાબ્જોદ્ભવપૂજિતાભ્યામ્
    નમો નમઃ શઙ્કરપાર્વતીભ્યામ્ ॥ ૧૦॥

નમઃ શિવાભ્યાં વિષમેક્ષણાભ્યામ્
    બિલ્વચ્છદામલ્લિકદામભૃદ્ભ્યામ્ ।
શોભાવતી શાન્તવતીશ્વરાભ્યામ્
    નમો નમઃ શઙ્કરપાર્વતીભ્યામ્ ॥ ૧૧॥

નમઃ શિવાભ્યાં પશુપાલકાભ્યામ્
    જગત્રયીરક્ષણ બદ્ધહૃદ્ભ્યામ્ ।
સમસ્ત દેવાસુરપૂજિતાભ્યામ્
    નમો નમઃ શઙ્કરપાર્વતીભ્યામ્ ॥ ૧૨॥

સ્તોત્રં ત્રિસન્ધ્યં શિવપાર્વતીભ્યામ્
    ભક્ત્યા પઠેદ્દ્વાદશકં નરો યઃ ।
સ સર્વસૌભાગ્ય ફલાનિ ભુઙ્ક્તે
    શતાયુરાન્તે શિવલોકમેતિ ॥ ૧૩॥

ઇતિ શ્રીશઙ્કરાચાર્યકૃતમ્ ઉમામહેશ્વરસ્તોત્રં સમ્પૂર્ણમ્ ॥

શ્રીશૈલેશભ્રમરામ્બાસ્તુતિઃ

Encoded and proofread by Sunder Hattangadi

*Uma-Maheshvara Stotra*

pdf was typeset on February 3, 2023

Please send corrections to *sanskrit@cheerful.com*